# ॥ श्रीशिवस्तुतिकदम्बम् ॥

.. shrIshivastutikadambam ..

sanskritdocuments.org

March 25, 2017

# .. shrIshivastutikadambam ..

# ॥ श्रीशिवस्तुतिकदम्बम् ॥

## Sanskrit Document Information

Text title : shrIshivastutikadambam

File name : shrIshivastutikadambam.itx

Location : doc_shiva

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 25, 2017

*sanskritdocuments.org*

# ॥ श्रीशिवस्तुतिकदम्बम् ॥

श्रीगणेशाय नमः ॥

आह्लादजनकस्याद्य सान्निध्यात्तव शङ्कर ।
चन्द्रश्चन्द्रत्वमापेदे जाने चन्द्रलसज्जट ॥ १॥

कालकूटं नीगृह्यादावरक्षः सकलं जगत् ।
को वाऽत्र विस्मयः शम्भो कालस्यैकस्य निग्रहे ॥ २॥

अभवस्त्वं सूचयितुं लोकानामर्धनारीशः ।
अर्धो वेत्याम्नायः स्वार्थपरो नार्थवाद इति ॥ ३॥

जडताविदलनदीक्षित जडतापहृतिं करोषि नो चेन्मे ।
दीक्षाभङ्गो न भवेद्दाक्षायण्याश्रिताङ्ग किमु तेन ॥ ४॥

पशुपतिमव मां शम्भो पशुपतिरसि गिरिश यस्मात्त्वम् ।
श्रुतिरप्येवं ब्रूते कर्तव्या ह्यात्मरक्षेति ॥ ५॥

शीर्षोपरि चन्द्रस्ते लोके शास्त्रे च विख्यातः ।
कण्ठोपर्यकलङ्कः पूर्णः कोऽयं निशाकरो ब्रूहि ॥ ६॥

कवित्ववारिशिशरन्निशेशं जडत्वनागेन्द्रविभेदसिंहम् ।
मृगत्वगाबद्धकटिप्रदेशं महत्त्वदं नौमि नताय शम्भुम् ॥ ७॥

यदङ्घ्रिपाथोरुहसेवनेन प्रयाति सर्वोत्तमतां जडोऽपि ।
तमम्बिकामानसपद्महंसमुपाश्रये सत्वरचित्तशुद्धये ॥ ८॥

बहूनां जनानां मनोऽभीष्टजातं सुसूक्ष्मं वितीर्याशु गर्वायसे त्वम् ।
महेशान यद्यस्ति शक्तिस्तवाहो महन्मन्मनोऽभीष्टमाशु प्रयच्छ ॥ ९॥

अपां पुष्पार्धस्य प्रतिदिनमहो धारणवशात्
प्रभो किं निर्वेदाद्धरणिगतपुष्पालिमधुना ।
रसाद्धत्से शीर्षे शशधरकिरीटागतनया-
सहाय प्रब्रूहि प्रणतजनकारुण्यभरित ॥ १०॥

बहोः कालात्किं वा शिरसि कृतवासं तव विधुं
वियोगं किं पत्युर्भृशमसहमाना स्वयमहो ।
समालिङ्गन्त्येताः पतिमतिरसात्पुष्पमिषतः

प्रभो तारास्तस्मादसि सुमकिरीटस्त्वमधुना ॥ ११॥

भक्तानां हृद्रथानां निजनिजपदवीप्राप्तये पार्वतीशः
कारुण्यापारवारान्निधिरगपतिजासंयुतः सम्भ्रमेण ।
आरुह्यैकं हि बाह्यं रथमिह निखिलांश्चालयन् किं पुरोक्तान्
गर्वं पक्षीशवाय्वोर्हरति करुणया शीघ्रनम्रेष्टदायी ॥ १२॥

मत्पापानां बहूनां परिमितिरधुनाऽधीश नास्त्येव नूनं
त्वद्वत्पापोपशान्तिप्रदमिह भुवने नास्ति दैवं च सद्यः ।
तस्मान्मत्पापराशिं दह दह तरसा देहि शुद्धां च बुद्धिं
स्रोतः श्रेष्ठावतंस प्रणतभयहर प्राणनाथागजायाः ॥ १३॥

कामं सन्तु सुराः स्वपादनमनस्तोत्रार्चनाभिश्चिरं
देहं कर्शयते जनाय फलदास्तान्नाश्रये जात्वपि ।
यो जात्वप्यवशात्स्वनाम वदते लोकाय शीघ्रेष्टदः
सोऽव्याद्धेतुविहीनपूर्णकरुणः कान्तायितार्धः शिवः ॥ १४॥

नित्यानित्यविवेकभोगविरती शान्त्यादिषट्कं तथा
मोक्षेच्छामनपायिनीं वितर भो शम्भो कृपावारिधे ।
वेदान्तश्रवणं तदर्थमननं ध्यानं चिरं ब्रह्मणः
सच्चिद्रूपतनोरखण्डपरमानन्दात्मनः शङ्कर ॥ १५॥

मन्नीकाशतनुं प्रगृह्य करुणावारान्निधे सत्वरं
शृङ्गाद्रौ वस मोदतः करुणया व्याख्यानसिंहासने ।
कुर्वँल्लोकततिं स्वधर्मनिरतां सौख्यैरशेषैर्वृता-
मद्वैतात्मविबोधपूर्णहृदयां चातन्वपर्णापते ॥ १६॥

यत्पदाम्बुजसमर्चनसक्तः सक्तिमाशु विषयेषु विहाय ।
सच्चिदात्मनि विलीनमनस्काः सम्भवन्ति तमहं शिवमीडे ॥ १७॥

रजनीवल्लभचूडो रजनीचरसेव्यपदपद्मः ।
राकाशशाङ्कधवलो राजति रमणीगृहीतवामाङ्गः ॥ १८॥

करवाणीतनुभिस्ते करवाणीशाङ्घ्रिसन्नतिं मोदात् ।
करवाणीतनुशुद्ध्यै करवाणीश्रीवहुत्वाय ॥ १९॥

इति श्रीशिवस्तवकदम्बं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIshivastutikadambam ..
was typeset using XeLaTeX 0.99996
on March 25, 2017

Please send corrections to *sanskrit@cheerful.com*